# Shri Turaja Stavaraja

# श्रीतुरजास्तवराजः

## Document Information

Text title : Turaja Sahasranama Stavaraja Tulaja TuLajA

File name : turajAstavarAjaH.itx

Category : devii, stavarAja, otherforms, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA

Description/comments : shrIskandapurANe sahyAdrikhaNDe turajAmahAtmye shrIshaNkaravariShThasaMvAde

Latest update : May 8, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# श्रीतुरजास्तवराजः

कथं रामेण सादेवी स्तुतादेववरोत्तम ।
सहस्त्रनामभिश्चैव पूजिता तद्वदस्वमे ॥ १॥

श्रीशङ्कर उवाच -
प्राप्यतं यामुनं शैलं रामचन्द्रः सलक्ष्मणः ।
यावश्चरति शैलेन्द्रे तावत्दृष्टाम्बिका शिवाम् ॥ २॥

ज्ञात्वातां जननीं रामो लक्ष्मणेनापि संयुतः
साष्टाङ्गप्रणिपत्यादौ स्तोतुं चैव प्रचक्रमे ॥ ३॥

श्रीरामचन्द्र उवाच -
नमामि त्वरितां देवि सुन्दरां सुभगां सुखाम् ।
नानारूप धरामाद्यां सर्वप्राणिहितेरताम् ॥ ४॥

षड्वक्र पुत्र निलयां सहस्त्रा रालयां पराम् ।
नागरूपां कुण्डलिनीमम्बादेवीं नमाम्यहम् ॥ ५॥

सोहं मन्त्रमयीं धीरामजपाजपरूपिणीम् ।
सर्वबीजमयीं शक्तिमम्बादेवीं नमाम्यहम् ॥ ६॥

ऐं बीजां वाग्भवां वाणीं वाग् गोचर मण्डलाम् ।
वाचस्पतिनुतां शक्तिमम्बादेवीं नमाम्यहम् ॥ ७॥

क्लीं कामबीजचलनां चातुर्वर्ण्यकृतालयाम् ।
कामेः कल्पित कन्दर्पामम्बादेवीं नमाम्यहम् ॥ ८॥

सौः सर्वसिद्धिजननीं सकलागमसेविताम् ।
सामिप्यदायिनीं शक्तिमम्बादेवीं नमाम्यहम् ॥ ९॥

नवाक्षर परां शान्तां षोडशाक्षरमीरिताम् ।
द्विपञ्चा षण्मातृरूपामम्बादेवीं नमाम्यहम् ॥ १०॥

कल्पतीतां विष्णुमायां बिन्दुत्रयकृतालयाम् ।
षट्कोणकोणमध्यस्थामम्बादेवीं नमाम्यहम् ॥ ११॥

वर्तुलां भैरवयुतामष्टवर्णैश्च युग्मकाम् ।
शूलवर्गाष्टकयुतामम्बादेवीं नमाम्यहम् ॥ १२॥

चक्रराजमयीं मन्त्रां सर्वचक्राणिसेविताम् ।
वेदाक्षरनुतां नीलामम्बादेवीं नमाम्यहम् ॥ १३॥

सप्तस्वरैर्गीयमानां मूर्च्छा ग्रामैर्निसेविताम् ।
तालनाट्यकृताह्लादामम्बादेवीं नमाम्यहम् ॥ १४॥

रजोरूपमयीं कालीं कालनिद्राप्रवर्तका ।
विष्णुनेत्रास्य निलयामम्बादेवीं नमाम्यहम् ॥ १५॥

सत्त्वस्थां सत्त्वसम्पन्नां सर्वलोकमनोरमा ।
लक्ष्मीं कमलहस्तानामम्बादेवीं नमाम्यहम् ॥ १६॥

तमःस्वरूपां कालींच सर्वकार्यविनाशिनी ।
कलाकाष्टादि कलनामम्बादेवीं नमाम्यहम् ॥ १७॥

अजरूपां बालरूपां दीर्घरूपां कृशाङ्गिका ।
स्थूलस्वरूपामपरामम्बादेवीं नमाम्यहम् ॥ १८॥

यमुनाद्रिकृतावासां योगिनीवृन्दसेविताम् ।
भक्ताह्लादकरीं शक्तिमम्बादेवीं नमाम्यहम् ॥ १९॥

श्रीशङ्कर उवाच -
एवं स्तुत्वा रामचन्द्रः पूजयामासतां शिवाम् ।
नामभिस्तु सहस्त्रैर्वै लक्ष्मणेनापिवन्दिताम् ॥ २०॥

इति श्रीस्कन्दपुराणे सह्याद्रीखण्डे तुरजामहात्म्ये
श्रीशङ्करवरिष्ठसंवादे तुरजा स्तवराजः सम्पूर्णः ।
तुलजास्तवराजः, तुळजास्तवराजः

*Shri Turaja Stavaraja*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*